**CLASS : 10th (Secondary)** **Code No. 2708**

**Series : Sec. M/16**

*रोल नं०* | | | | | | | | | | |

***SET : A***

# संस्कृत

*(Academic)*

**1st SEMESTER**

(Only for Re-appear Candidates)

(New Book)

**शेमुषी भाग – 2**

**(Morning Session)**

*समय* ***2½*** *घण्टे ]* *[ पूर्णांक :* ***80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ* ***8*** *तथा प्रश्न* ***12*** *हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये* ***कोड नम्बर*** *तथा* ***सेट*** *को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है,* ***परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***



Downloaded from cclchapter.com

***निर्देशः –*** *(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(iii) श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।*

**खण्डः 'क'**

( **अपठित-अवबोधनम्** )

**1.** अधोलिखितम् अनुच्छेदं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत – $2 \times 5 = 10$

संस्कृतभाषा भाषासु सर्वप्राचीना सर्वोत्तमा चास्ति। प्राचीनकाले संस्कृतभाषा लोकव्यवहारस्य भाषा आसीत्। जनाः संस्कृतभाषायां वार्तालापं कुर्वन्ति स्म। राजकार्याणि आपि संस्कृतभाषायामेव भवन्ति स्म। भारतीयभाषाणां समृद्धिः संस्कृतभाषां विना न भवितुं शक्नोति। इयं वैज्ञानिकी समृद्धा च भाषा अस्ति।

(क) जना संस्कृतभाषायां किम् कुर्वन्ति स्म ?

(ख) प्राचीनकाले संस्कृतभाषा कस्य भाषा आसीत् ?

(ग) भाषासु का सर्वप्राचीना सर्वोत्तमा चास्ति ?

(घ) केषां समृद्धिः संस्कृतभाषां विना न भवितुं शक्नोति ?

(ङ) अस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।

**खण्डः 'ख'**

( **रचनात्मक-लेखनम्** )

**2.** भवतः नाम जितेशः अस्ति। अध्ययनस्य प्रगतिविषये भ्रातरं प्रति लिखिते पत्रे मञ्जूषायां प्रदत्तैः पदैः पूरयित्वा उत्तरपुस्तिकायां लिखत – $1 \times 5 = 5$



Downloaded from cclchapter.com

परीक्षाभवनम्
तिथिः

पूज्य भ्रातः,

नमस्ते।

अधुना मम (i) ............ नियमेन आरब्धम्। अहं प्रतिदिनं प्रातः (ii) ............ उत्तिष्ठामि। सप्तवादनपर्यन्तं पठितानां (iii) ............ आवृत्तिं करोमि। संस्कृतविषये मया प्रथमं स्थानं प्राप्तम्। गणिते मम (iv) ............ अधुना इरीभूता। पितृभ्यां मम प्रणामाः।

भवदीयः अनुजः
(v) ............।

**मञ्जूषा**

| जितेशः, दुर्बलता, अध्ययनम्, पञ्चवादने, पाठानाम् । |
|---|

**3.** चित्रं दृष्ट्वा मञ्जूषातः उचितपदानि अवचित्य रिक्तस्थानानि पूरयित्वा उत्तरपुस्तिकायां लिखत – $1 \times 5 = 5$





Downloaded from cclchapter.com

(क) इदं चित्रं ................ वर्तते।

(ख) सरोवरतटे ................ वृक्षाः सन्ति।

(ग) सरोवरस्य जलं ................ वर्तते।

(घ) तटे ................ विकसितानि सन्ति।

(ङ) वृक्षेषु ................ तिष्ठन्ति।

**मञ्जूषा**

| |
|---|
| खगाः, पुष्पाणि, सरोवरतटस्य, सर्वत्र, निर्मलम् । |

**अथवा**

**( केवलं प्रज्ञाचक्षुर्भ्यः )**

'मम जननी' इति विषयम् अधिकृत्य पञ्चवाक्यानि संस्कृतभाषायां लिखत।

**खण्डः 'ग'**

**( अनुप्रयुक्त-व्याकरणम् )**

**4.** (क) करणकारकस्य परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 2

(ख) अव्ययस्य परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 2

**खण्डः 'घ'**

**( पठित-अवबोधनम् )**

**5.** अधोलिखितश्लोकस्य हिन्दीभाषायां व्याख्या कार्या – 5

*वयोबलशरीराणि देशकालाशनानि च ।*
*समीक्ष्य कुर्याद् व्यायाममन्यथा रोगमाप्नुयात् ।।*

**अथवा**



Downloaded from cclchapter.com

*विचित्रे खलु संसारे नास्ति किञ्चिन्निरर्थकम् ।*
*अश्वश्चेद् धावने वीरः भारस्य वहने खरः ।।*

**6.** अधोलिखितगद्यांशस्य हिन्दीभाषायां व्याख्या कार्या – 5

एषः भवतोः सौन्दर्यावलोकजनितेन कौतूहलेन पृच्छामिक्षत्रियकुल-पितामहयो सूर्यचन्द्रयोः को वा भवतोर्वंशस्य कर्त्ता ?

**अथवा**

एकदा केनापि आवश्यककार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता। मार्गे गहनकानने सा एकं व्याघ्रं ददर्श।

**7.** अधोलिखितासु ***सूक्तिद्वयस्य*** भावं हिन्दीभाषायां लिखत – $2\frac{1}{2} \times 2 = 5$

(क) प्रस्तरतले लतातरुगुल्मा नो भवन्तु पिष्टाः।

(ख) हरिततरुणां ललितलतानां माला रमणीया।

(ग) शरीरोपचयः कान्तिर्गात्राणां सुविभक्तता।

**8.** अधोलिखितं श्लोकं पठित्वा प्रदत्तप्रश्नानामुत्तराणि संस्कृतपूर्णवाक्येन लिखत – $2 \times 3 = 6$

*आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।*
*नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति।।*

(क) केन समः बन्धुः नास्ति ?

(ख) शरीरस्थः रिपुः कः अस्ति ?

(ग) किं कृत्वा मनुष्यः नावसीदति ?

**9.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानामुत्तराणि संस्कृतपूर्णवाक्येन लिखत – $2 \times 5 = 10$



Downloaded from cclchapter.com

ततस्तया वृद्धदासी साभिप्रायमालोकिता। तस्य हस्तात् प्रस्थमात्रं धान्यमादाय स्वगृहस्य चत्वरे तं प्रक्षालितपादम् उपावेशयत्। ततस्तान् सुरभीन् शालीनातपे किञ्चिद् विशोष्य मुहुर्मुहुः परिवर्त्य सभायां भूमौ अघट्टयत्। तुषेभ्यस्तण्डुलान्पृथक् कृत्वा धात्रीमुक्तवती-मातः ! इमान् भूषणमार्जनसमर्थान् तुषान् स्वर्णकारेभ्यो देहि।

(क) इमान् तुषान् केभ्यः देहि ?

(ख) साभिप्रायं का अवलोकिता ?

(ग) कुमारी तुषेभ्यः कान् पृथक् कृतवती ?

(घ) कुमारी शालीन् किं कृत्वा समायां भूमौ अघट्टयत् ?

(ङ) कुमारी शक्तिकुमारस्य हस्तात् किमादाय उपावेशयत् ?

**10.** रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत – 1 × 5 = 5

(क) फलच्छायासमन्वितः <u>वृक्षः</u> सेवितव्यः।

(ख) बुद्धिमती <u>चपेटतया</u> पुत्रौ प्रहृतवती।

(ग) <u>गात्राणां</u> सुविभक्तता व्यायामेन संभवति।

(घ) राजन् ! अलम् <u>अतिदाक्षिण्येन</u>।

(ङ) <u>स्वस्थजीवनाय</u> प्रदूषणरहिते वातावरणे भ्रमणीयम्।

**11.** 'शेमुषी' द्वितीयो भागः पाठ्यपुस्तकात् प्रथमसत्रीयपाठ्यक्रमात् कोऽपि ***एकः*** श्लोकः संस्कृतभाषायां लिखत। योऽस्मिन् प्रश्नपत्रे न स्यात्। 4

**खण्डः 'ङ'**

**( बहुविकल्पीय - खण्डम् )**

**12.** अधोलिखितप्रश्नानाम् प्रदत्तोत्तरविकल्पेषु एकं ***शुद्धविकल्पं*** विचित्य उत्तरपुस्तिकायां लिखत – 1 × 16 = 16

(क) 'सेयम्' पदस्य सन्धिविच्छेदोऽस्ति –

(i) से + यम्　　(ii) सा + इयम्

(iii) सा + यम्　　(iv) सै + यम्



Downloaded from cclchapter.com

(ख) 'कः + अत्र' सन्धियुक्तपदम् –

(i) कोऽत्र (ii) कस्त्र

(iii) कात्र (iv) कमत्र

(ग) 'पितरौ' इति पदे कः समासोऽस्ति ?

(i) कर्मधारयः (ii) तत्पुरुषः

(iii) द्वन्द्वः (iv) द्विगुः

(घ) 'निर्गुणम्' इति पदस्य समासविग्रहः –

(i) गुणे अभावः (ii) गुणानाम् अभावः

(iii) गुणेन भावः (iv) गुणम् भवः

(ङ) 'सह' इति पदस्य योगे का विभक्तिः प्रयुज्यते ?

(i) प्रथमा (ii) द्वितीया

(iii) चतुर्थी (iv) तृतीया

(च) 'वायुमण्डलं .............. प्रदूषितमस्ति। (रिक्तस्थानपूर्तिः अव्ययपदेन)

(i) भृशम् (ii) देवं

(iii) मुनिम् (iv) रामं

(छ) 'करणीयम्' इति पदे कः प्रत्ययः ?

(i) टाप् (ii) ङीप्

(iii) अनीयर् (iv) तव्यत्

(ज) 'छदत्वम्' इति पदे कः प्रत्ययः ?

(i) तल् (ii) त्व

(iii) तव्यत् (iv) क्त्वा

(झ) 'गुरुणा' इति पदे का विभक्तिः वर्तते ?

(i) प्रथमाविभक्तिः (ii) द्वितीयाविभक्तिः

(iii) तृतीयाविभक्तिः (iv) चतुर्थीविभक्तिः



Downloaded from cclchapter.com

(ञ) 'राम' शब्दस्य द्वितीया-एकवचने शब्दरूपम् अस्ति –

(i) रामाय (ii) रामेण

(iii) रामे (iv) रामम्

(ट) 'वसति' इति पदे कः लकारः वर्तते ?

(i) लट्लकारः (ii) लृट्लकारः

(iii) लोट्लकारः (iv) लङ्लकारः

(ठ) पठ्धातो लङ्लकारे प्रथमपुरुषैकवचने रूपं भवति –

(i) अपठः (ii) अपठत्

(iii) पठति (iv) पठिष्यति

(ड) वने **30** वृक्षा : सन्ति। (अङ्कस्थाने संस्कृतसंख्यावाचकपदं लिखत)

(i) विंशतिः (ii) चत्वारिशंत्

(iii) त्रिंशत् (iv) पञ्चाशत्

(ढ) 'कुटिलम्' इति पदस्य समानार्थकपदम् –

(i) वक्रम् (ii) आम्रम्

(iii) रसालम् (iv) जलम्

(ण) 'सार्थकम्' इति पदस्य विलोमपदम् अस्ति –

(i) देवम् (ii) रूपम्

(iii) निरर्थकम् (iv) विश्वम्

(त) 'अतिदीर्घः प्रवासः' अत्र विशेषणपदम् किम् ?

(i) अतिदीर्घः (ii) दीर्घः

(iii) प्रवासः (iv) वासः



Downloaded from cclchapter.com

**CLASS : 10th (Secondary)** **Code No. 2808**

**Series : Sec. M/2016**

*रोल नं०* | | | | | | | | | | |

***SET : A***

# संस्कृत

*(Academic)*

2nd Semester

(Only for Fresh/Re-appear Candidates)

**शेमुषी (नई पुस्तक)**

**(Morning Session)**

*समय : **2½** घण्टे ]* *[ पूर्णांक : **80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **8** तथा प्रश्न **11** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** तथा **सेट** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***



Downloaded from cclchapter.com

***निर्देश :*** *(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(iii) श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।*

**खण्डः 'क'**

**(अपठित - अवबोधनम्)**

**1.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत – $5 \times 2 = 10$

संगणकं महत् - यन्त्रम् अस्ति। बैंकिंगक्षेत्रे अस्य योगदानम् अपूर्वम् अस्ति। संगणकेन देशस्य सुदूरतमे भागे विदेशे वा द्रुतगत्या रूप्यकाणां स्थानान्तरणं प्रेषणं वा कर्तुं शक्यते। अद्य अध्ययनस्य क्षेत्रे अपि अस्य योगदानं कदापि विस्मारयितुं न शक्यते। अद्य जीवनं तु संगणकं विना अपूर्णम् अस्ति। जालपुट (इन्टरनेट) माध्यमेन तु विश्वस्य जनैः सह वार्तालापः विचारविमर्शः च एकः क्रान्तिकारी प्रयोगः वर्तते।

(क) संगणकम् कीदृशं यन्त्रम् अस्ति ?

(ख) रूप्यकाणां स्थानान्तरणं केन कर्तुं शक्यते ?

(ग) कस्मिन् क्षेत्रे अस्य योगदानम् अपूर्वम् अस्ति ?

(घ) अद्य जीवनं संगणकं विना कीदृशम् अस्ति ?

(ङ) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।

**खण्डः 'ख'**

**(रचनात्मक - लेखनम्)**

**2.** (क) भवान् देवः। विद्यायाः महत्त्वम् वर्णयन् स्व-अनुजं प्रति लिखितं पत्रं मञ्जूषातः उचितपदैः पूरयित्वा उत्तरपुस्तिकायां लिखित – $5 \times 1 = 5$



Downloaded from cclchapter.com

परीक्षाभवनम्
तिथिः

प्रिय अनुज,

शुभाशीर्वादः।

अत्र कुशलं तत्रास्तु। मातुः पत्रम् प्राप्तम्। समाचारं ज्ञातं यत् तव पठने (i) .................. न अस्ति। एतत् तु न उचितम्। विद्याहीनः (ii) .................. पशुतुल्यः भवति। विद्यावान् (iii) .................. पूज्यते। अतः आलस्यं विहाय (iv) .................. कुरु। पठितानां (v) .................. पुनः पुनः अभ्यासं कुरु।

तव भ्राता
देवः

**मञ्जूषा**

| परिश्रमम् , पाठानाम् , रुचिः, सर्वत्र, नरः। |
|---|

(ख) चित्रं दृष्ट्वा मञ्जूषातः उचितपदानि चित्वा रिक्तस्थानानि पूरयत – 5 × 1 = 5





Downloaded from cclchapter.com

(i) इदं चित्रं ................. अस्ति।

(ii) सरोवरतटे विशालः ................... अस्ति।

(iii) वृक्षे ................... कूर्दन्ति।

(iv) चित्रे मृगाः ................... पिबन्ति।

(v) तटे बालकाः .................. क्रीडन्ति।

**मञ्जूषा**

| जलम् ,कन्दुकेन, सरोवरतटस्य, वृक्षः, वानराः। |
|---|

**अथवा**

**(केवलं प्रज्ञाचक्षुर्भ्यः)**

'मम विद्यालयः' इति विषयम् अधिकृत्य पंच-वाक्यानि संस्कृतभाषायां लिखत।

## खण्डः 'ग'

## (अनुप्रयुक्त - व्याकरणम्)

**3.** (क) 'गुणसन्धेः' अथवा 'व्यञ्जनसन्धेः' परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 2

(ख) 'अव्ययीभावसमासस्य' अथवा 'कर्मधारयसमासस्य' परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 2

## खण्डः 'घ'

## (पठित - अवबोधनम्)

**4.** अधोलिखितगद्यांशस्य हिन्दीभाषायां व्याख्या कार्या – 5

(क) कश्चिद् राजा स्वमनसि निरन्तरं प्रवर्तमानायाजिज्ञासायाः समाधानाय कस्मिँश्चिदाश्रमे निवसतो मुनेः पार्श्वमुपागच्छत्। तदानीं मुनिः स्वकार्यसंलग्न एव राजानं यथेष्टमभ्यनन्दत्।

**अथवा**

(ख) चाणक्यः – भो श्रेष्ठिन्। चन्द्रगुप्तराज्यमिदं न नन्दराज्यम्। नन्दस्यैव अर्थसम्बन्धः प्रीतिमुत्पादयति।



Downloaded from cclchapter.com

**5.** अधोलिखितश्लोकस्य हिन्दीभाषायां व्याख्या कार्या – 5

(क) सुलभेष्वर्थलाभेषु परसंवेदने जने।
क इदं दुष्करं कुर्यादिदानीं शिविना विना।।

**अथवा**

(ख) रात्रौ जानुर्दिवा भानुः सन्ध्ययोर्द्वयोः।
इत्थं शीतं मया नीतं जानु भानु कृशानु भिः।।

**6.** अधोलिखितगद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखित – $5 \times 2 = 10$

कश्चन निर्धनो जनः भूरि परिश्रम्य किञ्चिद् वित्तमुपार्जितवान्। तेन स्वपुत्रं एकस्मिन् महाविद्यालये प्रवेशं दापयितुं सफलो जातः। तत्तनयः तत्रैव छात्रावासे निवसन् अध्ययने संलग्नः समभूत्। एकदा स पिता तनूजस्य रुग्णतामाकर्ण्य व्याकुलो जातः पुत्रं द्रष्टुं च प्रस्थितः। परमर्थकार्श्येन पीडितः सः बसयानं विहाय पदातिरेव प्राचलत्।

(क) निर्धनः केन पीडितः आसीत् ?

(ख) निर्धनः स्वपुत्रं द्रष्टुं कथं प्राचलत् ?

(ग) निर्धनः जनः परिश्रम्य किम् उपार्जितवान् ?

(घ) पिता कस्य रुग्णतामाकर्ण्य व्याकुलो जातः ?

(ङ) निर्धनः स्वपुत्रं कुत्र प्रवेशं दापयितुं सफलो जातः ?

**7.** अधोलिखितं श्लोकं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत – $3 \times 2 = 6$

रे रे चातक ! सावधानमनसा मित्र क्षणं श्रूयता –
मम्भोदा बहवो हि सन्ति गगने सर्वेऽपि नैतादृशाः।
केचिद् वृष्टिभिरार्द्रयन्ति वसुधां गर्जन्ति केचिद् वृथा,
यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः।।



Downloaded from cclchapter.com

(क) कीदृशं वचः मा ब्रूहि ?

(ख) गगने बहवः के सन्ति ?

(ग) अम्भोदाः वृष्टिभिः काम् आर्द्रयन्ति ?

**8.** प्रदत्तसूक्तिषु ***द्वयोः*** भावार्थं लिखत – $2 \times 2½ = 5$

(क) अद्याशनं शिशुजनस्य बलेन जातम्।

(ख) भोक्तारमर्धनयनेन विलोकयन्ति।

(ग) न सा बकसहस्रेण परितस्तीरवासिना।

**9.** रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत – $5 \times 1 = 5$

(क) चौरः कर्पटम् क्षिप्त्वा निर्गतः।

(ख) पुत्रं द्रष्टुं सः प्रस्थितः।

(ग) मालाकारः तोयैः तरोः पुष्टिं करोति।

(घ) आर्यस्य प्रसादेन मे वाणिज्या अखण्डिता।

(ङ) राजा शस्त्राहतस्य सहायताम् अकरोत्।

**10.** प्रश्नपत्रे लिखितं श्लोकं विहाय 'शेमुषी' द्वितीयो भागः पाठ्यपुस्तकात् एकं श्लोकं संस्कृतभाषायां लिखत। 4

## खण्डः 'ङ'

## (बहुविकल्पीय - प्रश्नाः)

**11.** अधोलिखितप्रश्नानां प्रदत्तचतुर्षु वैकल्पिक-उत्तरेषु उचितमुत्तरं विचित्य लिखित – $16 \times 1 = 16$

(क) 'यन्न' इति पदे कः सन्धिविच्छेदः ?

(i) यः + न (ii) यत् + न

(iii) यो + न (iv) यान् + न



Downloaded from cclchapter.com

(ख) 'भोजन + अन्ते' अत्र सन्धियुक्तपदम् –

(i) भोजन्ते (ii) भोजने

(iii) भोजनाने (iv) भोजनान्ते

(ग) 'राजहंसः' इति पदस्य विग्रहपदम् –

(i) राजा च असौ हंसः (ii) राज्ञा हंसः

(iii) राज्ञः हंसः (iv) राज्ञि हंसः

(घ) 'राजपुरुषः' इति पदे कः समासः ?

(i) कर्मधारयः (ii) तत्पुरुषः

(iii) नञ्तत्पुरुषः (iv) द्विगुः

(ङ) 'निकषा' पदस्य योगे का विभक्तिः ?

(i) प्रथमा (ii) तृतीया

(iii) द्वितीया (iv) पञ्चमी

(च) 'वन' शब्दस्य सप्तम्यैकवचने किं रूपम् ?

(i) वने (ii) वनस्य

(iii) वनेन (iv) वनाय

(छ) 'गच्छतु' इति पदे का धातुः ?

(i) गत् (ii) गच्

(iii) गम् (iv) गच्छत्

(ज) 'वर्षति' इति पदे कः लकारः ?

(i) लट् (ii) लुट्

(iii) लिट् (iv) लङ्

(झ) 'हसन्' इति पदे कः प्रत्ययः ?

(i) क्त (ii) क्त्वा

(iii) तुमुन् (iv) शतृ

(ञ) 'पठ् + तव्यत्' इति संयोगे किं रूपम् ?

(i) पठतव्यत् (ii) पठितव्यः

(iii) पठित्वा (iv) पठितः



Downloaded from cclchapter.com

(ट) ............ भवतो व्यवहारेण कोपो मे गलितः।

(रिक्तस्थानपूर्तिः अव्ययपदेन)

(i) मुनिः (ii) राजा

(iii) आश्रमे (iv) अधुना

(ठ) 'महाकविः कालिदासः पुरा अभवत्।' अत्र अव्ययपदं किम् ?

(i) महाकविः (ii) कालिदासः

(iii) पुरा (iv) अभवत्

(ड) 'चतुः पञ्चाशत्' इति पदे का संख्या ?

(i) 44 (ii) 54

(iii) 64 (iv) 74

(ढ) 'पर्याकुलम्' इति पदस्य किं समानार्थकपदम् ?

(i) व्याकुलम् (ii) नष्टाः

(iii) हतम् (iv) हसन्

(ण) 'दयार्द्रः मुनिः' अत्र विशेषणपदम् किम् ?

(i) मुनिः (ii) मुनिना

(iii) दयार्द्रः (iv) दया

(त) 'कतिपयैः दिवसैः' अत्र विशेष्यपदम किम् ?

(i) कतिपयैः (ii) दिवसैः

(iii) कति (iv) दिवसः



Downloaded from cclchapter.com

**CLASS : 10th (Secondary)** **Code No. 2708**

**Series : Sec. M/16**

*रोल नं०* | | | | | | | | | | |

**SET : B**

# संस्कृत

*(Academic)*

**1st SEMESTER**

(Only for Re-appear Candidates)

(New Book)

**शेमुषी भाग – 2**

**(Morning Session)**

*समय* **2½** *घण्टे ]* *[ पूर्णांक :* **80**

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ* **8** *तथा प्रश्न* **12** *हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये* ***कोड नम्बर*** *तथा* ***सेट*** *को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है,* ***परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***



Downloaded from cclchapter.com

***निर्देशः –*** *(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(iii) श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।*

## खण्डः 'क'

## ( अपठित-अवबोधनम् )

**1.** अधोलिखितम् अनुच्छेदं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत – $2 \times 5 = 10$

संस्कृतभाषा प्राचीनतमा भाषा अस्ति। देववाणी, गीर्वाणवाणी देवभाषा च संस्कृतस्य पर्यायवाचिनः शब्दाः सन्ति। गुप्तसाम्राज्यकाले संस्कृतं राज्यभाषा आसीत्। अद्यापि विदेशेषु संस्कृतस्य गौरवं वर्तते। संस्कृतस्य प्रचारेण एव हिन्दीसाहित्यस्य उत्तरोत्तरं वृद्धिः भवति। अस्माकं प्राचीनाः ऋषयः मुनयश्च अस्यामेव निजग्रन्थान् अलिखन्।

(क) कदा संस्कृतं राज्यभाषा आसीत् ?

(ख) अद्यापि विदेशेषु कस्य गौरवं वर्तते ?

(ग) संस्कृतभाषा कीदृशी भाषा अस्ति ?

(घ) संस्कृतस्य प्रचारेण कस्य उत्तरोत्तरं वृद्धिः भवति ?

(ङ) अस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।

## खण्डः 'ख'

## ( रचनात्मक-लेखनम् )

**2.** भवतः नाम क्षितिजः अस्ति। विद्यालयस्य क्रीडादिवससमारोहविषये मित्रं प्रति लिखिते पत्रे मञ्जूषायां प्रदत्तैः पदैः पूरयित्वा उत्तरपुस्तिकायां लिखत – $1 \times 5 = 5$



Downloaded from cclchapter.com

परीक्षाभवनम्
तिथिः

प्रियमित्र राकेश,

सप्रेम नमस्ते।

अत्र (i) ............ तत्रास्तु। अस्माकं विद्यालये गतदिवसे (ii) ............ मानितोऽभवत्। छात्राः अपूर्वेण (iii) ............ विविधासु क्रीडासु भागः गृहीतः। मयापि धावनप्रतियोगितायां भागः गृहीतः।


पितरौ (iv) ............ ।

भवतः सुहृद्
(v) ............।

**मञ्जूषा**

| |
|---|
| क्षितिजः, वन्दनीयौ, कुशलम्, क्रीडादिवसः, उत्साहेन। |

**3.** चित्रं दृष्ट्वा मञ्जूषातः उचितपदानि अवचित्य रिक्तस्थानानि पूरयित्वा उत्तरपुस्तिकायां लिखत – $1 \times 5 = 5$



(क) इदं ................ यातायातस्य अस्ति।



Downloaded from cclchapter.com

(ख) एकः ................ द्विचक्रिकया गच्छति।
(ग) यानानि ................ गच्छन्ति।
(घ) एकः नरः ................ प्रतीक्षां करोति।
(ङ) यानानि कज्जलमलिनं धूमं ................ ।

**मञ्जूषा**

| मुञ्चन्ति, चित्रम्, बसयानस्य, इतस्ततः, नरः। |
|---|

**अथवा**

**( केवलं प्रज्ञाचक्षुर्भ्यः )**

'जलस्य महत्त्वम्' इति विषयम् अधिकृत्य पञ्चवाक्यानि संस्कृतभाषायां लिखत।

**खण्डः 'ग'**

**( अनुप्रयुक्त-व्याकरणम् )**

**4.** (क) कर्त्ताकारकस्य परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 2

(ख) उपसर्गस्य परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 2

**खण्डः 'घ'**

**( पठित-अवबोधनम् )**

**5.** अधोलिखितश्लोकस्य हिन्दीभाषायां व्याख्या कार्या – 5

*व्यायामो हि सदा पथ्यो बलिनां स्निग्धभोजिनाम्।*
*स च शीते वसन्ते च तेषां पथ्यतमः स्मृतः।।*

**अथवा**

*आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।*
*नास्त्युद्यमसमो बन्धुः कृत्वा मं नावसीदति।।*



Downloaded from cclchapter.com

**6.** अधोलिखितगद्यांशस्य हिन्दीभाषायां व्याख्या कार्या – 5

न हि जानाम्यस्य नामधेयम्। न कश्चिदस्मिन् तपोवने तस्य नाम व्यवहरति।

**अथवा**

भयाकुलं व्याघ्रं दृष्ट्वा कश्चित् धूर्तः श्रृगालः हसन्नाह – "भवान् कुतः भयात् पलायितः ?"

**7.** अधोलिखितासु ***सूक्तिद्वयस्य*** भावं हिन्दीभाषायां लिखत – $2\frac{1}{2} \times 2 = 5$

(क) दुर्वहमत्र जीवितं जातं प्रकृतिरेव शरणम्।

(ख) शरीरायासजननं कर्म व्यायामसंज्ञितम् ।

(ग) नवमालिका रसालं मिलिता रुचिरं संगमनम्।

**8.** अधोलिखितं श्लोकं पठित्वा प्रदत्तप्रश्नानामुत्तराणि संस्कृतपूर्णवाक्येन लिखत – $2 \times 3 = 6$

*सेवितव्यो महावृक्षः फलच्छायासमन्वितः।*
*यदि दैवात् फलं नास्ति छाया केन निवार्यते।।*

(क) दैवात् किं नास्ति ?

(ख) कः सेवितव्यः भवति ?

(ग) का न निवार्यते ?

**9.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानामुत्तराणि संस्कृतपूर्णवाक्येन लिखत – $2 \times 5 = 10$

अस्ति द्रविडेषु काञ्ची नाम नगरी। तस्यामनेककोटिसारः श्रेष्ठिपुत्रः शक्तिकुमारो नामासीत्। सोऽष्टादशवर्षदेशीयः चिन्तामापन्नः – 'नास्त्यदाराणाम् अननुगुणदाराणां वा सुखम्। तत्कथं नु गुणवद् विन्देयम् कलत्रम्।' स वस्त्रान्तपिनद्धशालिप्रस्थो दारग्रहणाय भुवमभ्रमत्।



Downloaded from cclchapter.com

(क) शक्तिकुमारः कः आसीत् ?

(ख) काञ्ची नाम नगरी कुत्र अस्ति ?

(ग) शक्तिकुमारः कस्य पुत्रः आसीत् ?

(घ) कलत्रं कीदृशं भवितव्यम् ?

(ङ) संसारे केषां सुखं नास्ति ?

**10.** रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत – $1 \times 5 = 5$

(क) नराणां प्रथमः शत्रुः क्रोधः।

(ख) त्वम् मानुषात् विभेषि।

(ग) अरयः व्यायामिनं न अर्दयन्ति।

(घ) रामः लवकुशौ आसनार्धम् उपवेशयति।

(ङ) उद्याने पक्षिणां कलरवं चेतः प्रसादयति।

**11.** 'शेमुषी' द्वितीयो भागः पाठ्यपुस्तकात् प्रथमसत्रीयपाठ्यक्रमात् कोऽपि ***एकः*** श्लोकः संस्कृतभाषायां लिखत। योऽस्मिन् प्रश्नपत्रे न स्यात्। 4

**खण्डः 'ङ'**

**( बहुविकल्पीय - खण्डम् )**

**12.** अधोलिखितप्रश्नानाम् प्रदत्तोत्तरविकल्पेषु एकं ***शुद्धविकल्पं*** विचित्य उत्तरपुस्तिकायां लिखत – $1 \times 16 = 16$

(क) 'एकैकः' पदस्य सन्धिविच्छेदोऽस्ति –

(i) एक + एकः (ii) ए + कैकः

(iii) एक + कः (iv) क + एका

(ख) 'स्यात् + न' सन्धियुक्तपदम् –

(i) स्याम् (ii) स्वाति

(iii) स्यान्न (iv) स्यामन



Downloaded from cclchapter.com

(ग) 'रामलक्ष्मणौ' इति पदे कः समासोऽस्ति ?

(i) द्विगुः (ii) द्वन्द्वः

(iii) तत्पुरुषः (iv) कर्मधारयः

(घ) 'शरीरस्थः' इति पदस्य समासविग्रहः –

(i) शरीरे स्थितः (ii) शीर स्थः

(iii) शरीरे थः (iv) शरीर + स्थः

(ङ) 'बहिः' इति पदस्य योगे का विभक्तिः प्रयुज्यते ?

(i) प्रथमा (ii) तृतीया

(iii) चतुर्थी (iv) पञ्चमी

(च) …………… समयस्य सदुपयोगः करणीयः। (रिक्तस्थानपूर्तिः अव्ययपदेन)

(i) ईश्वरः (ii) नरः

(iii) रामः (iv) सदा

(छ) 'वरणीया' इति पदे कः प्रत्ययः ?

(i) तल् (ii) त्व

(iii) अनीयर् (iv) तव्यत्

(ज) 'प्रक्षाल्य' इति पदे कः प्रत्ययः ?

(i) ल्यप् (ii) क्त

(iii) तव्यत् (iv) टाप्

(झ) 'गुरौ' इति पदे का विभक्तिः वर्तते ?

(i) द्वितीयाविभक्तिः (ii) सप्तमीविभक्तिः

(iii) तृतीयाविभक्तिः (iv) पञ्चमीविभक्तिः

(ञ) 'हरि' शब्दस्या द्वितीया-एकवचने शब्दरूपम् अस्ति –

(i) हरिणा (ii) हरये

(iii) हरिम् (iv) हरेः



Downloaded from cclchapter.com

(ट) 'आसीत्' इति पदे कः लकारः वर्तते ?

(i) लट्लकारः (ii) लङ्लकारः

(iii) लोट्लकारः (iv) लृट्लकारः

(ठ) 'पठ्' धातो लृट्लकारे प्रथमपुरुषैकवचने रूपं भवति –

(i) पठ्तु (ii) पठ

(iii) पठिष्यति (iv) पठति

(ड) उपवने **25** खगाः सन्ति। (अङ्कस्थाने संस्कृतसंख्यावाचकपदं लिखत)

(i) पञ्चाशत् (ii) त्रिंशत्

(iii) चत्वारिशंत् (iv) पञ्चविंशतिः

(ढ) आम्रम्' इति पदस्य समानार्थकपदम् –

(i) गुणम् (ii) रूपम्

(iii) रसालम् (iv) जलम्

(ण) 'सम्पत्तौ' इति पदस्य विलोमपदम् अस्ति –

(i) विपत्तौ (ii) पत्तौ

(iii) रूपौ (iv) ग्रहौ

(त) 'हृदयग्राही स्पर्शः' अत्र विशेषणपदम् किम् ?

(i) हृदयः (ii) हृदयग्राही

(iii) स्पर्शः (iv) हृदयग्रः



Downloaded from cclchapter.com

**CLASS : 10th (Secondary)** **Code No. 2808**

**Series : Sec. M/2016**

*रोल नं०* | | | | | | | | | | |

**SET : B**

# संस्कृत

*(Academic)*

2nd Semester

(Only for Fresh/Re-appear Candidates)

**शेमुषी (नई पुस्तक)**

**(Morning Session)**

*समय : **2½** घण्टे ]* *[ पूर्णांक : **80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **8** तथा प्रश्न **11** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** तथा **सेट** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***



Downloaded from cclchapter.com

***निर्देश :*** *(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(iii) श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।*

## खण्डः 'क'

## (अपठित - अवबोधनम्)

**1.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत – $5 \times 2 = 10$

एतत् विज्ञानस्य युगम् अस्ति। जीवनस्य विविधेषु क्षेत्रेषु वयं विज्ञानस्य चमत्कारान् पश्यामः। आवश्यकता आविष्कारस्य जननी अस्ति। वायुयानस्य आविष्कारेण अद्य वयं अल्पसमये एव विश्वस्य कस्यापि देशस्य यात्रां कर्तुं शक्नुमः। दूरदर्शनस्य आविष्कारेण विश्वस्य कस्यापि स्थानस्य घटनायाः अवलोकनं कर्तुं शक्नुमः। अद्य चिकित्सकाः असाध्यरोगाणां चिकित्सां कर्तुं समर्थाः सन्ति।

(क) का आविष्कारस्य जननी अस्ति ?

(ख) एतत् कस्य युगम् अस्ति ?

(ग) चिकित्सकाः केषां चिकित्सां कर्तुं समर्थाः सन्ति ?

(घ) वयं केन विश्वस्य यात्रां कर्तुं शक्नुमः ?

(ङ) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।



Downloaded from cclchapter.com

## खण्डः 'ख'
## (रचनात्मक - लेखनम्)

**2.** (क) भवान् ईशानः। स्व-अध्ययनस्य प्रगतिविषये मातरं प्रति लिखितं पत्रं मञ्जूषायां प्रदत्तैः पदैः पूरयित्वा उत्तरपुस्तिकायां लिखित : $5 \times 1 = 5$

परीक्षाभवनम्
तिथिः

पूज्ये (i) .................,

सादरं प्रणामः।

अत्र कुशलं तत्रास्तु। अहं मनोयोगेन (ii) .................। अहं (iii) ................. प्रातः पञ्चवादने उत्तिष्ठामि। ततः दैनिककृत्यं कृत्वा पठितानां पाठानाम् (iv) ................. करोमि। संस्कृतविषये मया (v) ................. स्थानं प्राप्तम्। पितृचरणयोः मम प्रणामाः।

भवत्याः पुत्रः
ईशानः

**मञ्जूषा**

| आवृत्तिम् , प्रथमम् , मातः, प्रतिदिनं, पठामि। |
|---|

(ख) चित्रं दृष्ट्वा मञ्जूषातः उचितपदानि चित्वा रिक्तस्थानानि पूरयत – $5 \times 1 = 5$





Downloaded from cclchapter.com

(i) इदं चित्रं ................. अस्ति।

(ii) चित्रे एकं ................... अपि दृश्यते।

(iii) छात्राः ................... क्रीडन्ति।

(iv) अस्मिन् चित्रे ................... अपि अस्ति।

(v) बालकाः .................. अपि खेलन्ति।

**मञ्जूषा**

| |
|---|
| क्रीडाशिक्षकः, क्रिकेटक्रीडाम् , क्रीडाक्षेत्रस्य, भवनम् , कन्दुकेन। |

**अथवा**

**(केवलं प्रज्ञाचक्षुर्भ्यः)**

'मम जननी' इति विषयम् अधिकृत्य पञ्च-वाक्यानि संस्कृतभाषायां लिखत।

## खण्डः 'ग'

## (अनुप्रयुक्त - व्याकरणम्)

**3.** (क) 'दीर्घसन्धेः' अथवा 'विसर्गसन्धेः' परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 2

(ख) 'तत्पुरुषसमासस्य' अथवा 'द्वन्द्वसमासस्य' परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 2

## खण्डः 'घ'

## (पठित - अवबोधनम्)

**4.** अधोलिखितगद्यांशस्य हिन्दीभाषायां व्याख्या कार्या – 5

(क) राजा तं मुनिं प्रश्नत्रयमपृच्छत् – कः समयः श्रेष्ठः ? कः पुरुषः श्रेष्ठः ? किं कर्म च श्रेष्ठम् ? इति। मुनिस्तु राजानं प्रति न ध्यात्वा स्वकार्यमेवाकरोत्।

**अथवा**

(ख) चाणक्यः – भो श्रेष्ठिन् ! प्रीताभ्यः प्रकृतिभ्यः प्रतिप्रियमिच्छन्ति राजानः।

चन्दनदासः – आज्ञापयतु आर्यः। किं कियत् च अस्मज्जनादिष्यते इति।



Downloaded from cclchapter.com

**5.** अधोलिखितश्लोकस्य हिन्दीभाषायां व्याख्या कार्या – 5

(क) एक एव खगो मानी वने वसति चातकः।
पिपासितो वा म्रियते याचते वा पुरन्दरम्।।

**अथवा**

(ख) दुष्कराणि-अपि कर्माणि मतिवैभवशालिनः।
नीतिं युक्तिं समालम्ब्य लीलयैव प्रकुर्वते।।

**6.** अधोलिखितगद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखित – $5 \times 2 = 10$

तस्यामेव रात्रौ तस्मिन् गृहे कश्चन चौरः गृहाभ्यन्तरं प्रविष्टः। तत्र निहितामेकां मञ्जूषाम् आदाय पलायितः। चौरस्य पादध्वनिना प्रबुद्धोऽतिथिः चौरशङ्कया तमन्वधावत् अग्रहणाच्च, परं विचित्रमघटत। चौरः एव उच्चैः क्रोशितुमारभत 'चौरोऽयं चौरोऽयम्' इति। तस्य तारस्वरेण प्रबुद्धाः ग्रामवासिनः स्वगृहाद् निष्क्रम्य तत्रागच्छन्।

(क) अतिथिः केन प्रबुद्धः ?

(ख) गृहाभ्यन्तरं कः प्रविष्टः ?

(ग) चौरः काम् आदाय पलायितः ?

(घ) के स्वगृहाद् निष्क्रम्य तत्रागच्छन् ?

(ङ) 'चौरोऽयं चौरोऽयम्' इति क्रोशितुं कः आरभत ?

**7.** अधोलिखितं श्लोकं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत – $3 \times 2 = 6$

आपेदिरेऽम्बरपथं परितः पतङ्गाः,
भृङ्गा रसालमुकुलानि समाश्रयन्ते।
सङ्कोचमञ्चति सरस्त्वयि दीनदीनो,
मीनो नु हन्त कतमां गतिमभ्युपैतु।।

(क) सङ्कोचं किम् अञ्चति ?



Downloaded from cclchapter.com

(ख) अम्बरपथं के आपेदिरे ?

(ग) भृङ्गाः कानि समाश्रयन्ते ?

**8.** प्रदत्तसूक्तिषु ***द्वयोः*** भावार्थं लिखत – $2 \times 2\frac{1}{2} = 5$

(क) प्रायो दरिद्रशिशवः परमन्दिराणाम्।

(ख) नैच्छद् दरिद्रगृहिणी रजनीविरामम्।

(ग) प्राणेभ्योऽपि प्रियः सुहृद्।

**9.** रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत – $5 \times 1 = 5$

(क) उभौ शवं <u>चत्वरे</u> स्थापितवन्तौ।

(ख) <u>शिशुजनस्य</u> अद्य अशनं जातम्।

(ग) चातकः <u>वने</u> वसति।

(घ) <u>तृणानाम्</u> अग्निना सह विरोधो भवति।

(ङ) <u>एतादृशी</u> भयावहघटना गढवालक्षेत्रे घटिता।

**10.** प्रश्नपत्रे लिखितं श्लोकं विहाय 'शेमुषी' द्वितीयो भागः पाठ्यपुस्तकात् एकं श्लोकं संस्कृतभाषायां लिखत। 4

**खण्डः 'ङ'**

**(बहुविकल्पीय - प्रश्नाः)**

**11.** अधोलिखितप्रश्नानां प्रदत्तचतुर्षु वैकल्पिक-उत्तरेषु उचितमुत्तरं विचित्य लिखित – $16 \times 1 = 16$

(क) 'किञ्च' इति पदे कः सन्धिविच्छेदः ?

(i) किम् + च (ii) कि + च

(iii) कञ् + च (iv) कश् + च



Downloaded from cclchapter.com

(ख) 'यथा + इष्टम्' अत्र सन्धियुक्तपदम् –

(i) यथाष्टम् (ii) यथेष्टम्

(iii) यथाम् (iv) यथेव

(ग) 'शस्त्राहतः' इति पदस्य विग्रहपदम् –

(i) शस्त्र आहतः (ii) शस्त्र हतः

(iii) शस्त्रणा हत (iv) शस्त्रेण आहतः

(घ) 'पीतपङ्कजम्' इति पदे कः समासः –

(i) तत्पुरुषः (ii) द्विगुः

(iii) कर्मधारयः (iv) नञ्तत्पुरुषः

(ङ) 'प्रति' इति उपपदस्य योगे का विभक्तिः भवति ?

(i) प्रथमा (ii) द्वितीया

(iii) तृतीया (iv) चतुर्थी

(च) 'तरु' शब्दस्य षष्ठ्यैकवचने किं रूपम् ?

(i) तरोः (ii) तरवे

(iii) तरुणा (iv) तरुम्

(छ) 'अगच्छत्' इति पदे कः लकारः ?

(i) लोट्लकारः (ii) लङ्लकारः

(iii) लट्लकारः (iv) लृट्लकारः

(ज) 'शोचति' इति पदे का धातुः ?

(i) शच् (ii) शाच्

(iii) शुच् (iv) शञ्च्

(झ) 'नियुक्तः' इति पदे कः प्रत्ययः ?

(i) क्तवा (ii) तुमुन्

(iii) ल्यप् (iv) क्त

(ञ) 'पठ् + अनीयर्' इति संयोगे किं रूपम् ?

(i) पठनीयः (ii) पठित्वा

(iii) पठितः (iv) पठितवान्



Downloaded from cclchapter.com

(ट) राजा आश्रमे मुनेः ............ अगच्छत्।

(रिक्तस्थानपूर्तिः अव्ययपदेन)

(i) पार्श्वम् (ii) राज्ञः

(iii) राज्ञि (iv) राजानम्

(ठ) 'सिंहः उच्चैः गर्जति' अत्र अव्ययपदं किम् ?

(i) सिंहः (ii) गर्जति

(iii) उच्चैः (iv) गर्ज्

(ड) 'पञ्चपञ्चाशत्' इति पदे का संख्या ?

(i) 35 (ii) 45

(iii) 55 (iv) 65

(ढ) 'विशीर्णाः' इति पदस्य किं समानार्थकपदम् ?

(i) नष्टाः (ii) क्रोधः

(iii) सत्यः (iv) द्वेषः

(ण) 'श्रेष्ठम् कर्म' अत्र विशेषणपदम् किम् ?

(i) श्रेषः (ii) कर्म

(iii) श्रेष्ठम् (iv) करः

(त) 'विचित्रा दैवगतिः' अत्र विशेष्यपदं किम् ?

(i) वि (ii) चित्रा

(iii) विचित्रा (iv) दैवगतिः



Downloaded from cclchapter.com

CLASS : 10th (Secondary) **Code No. 2708**

**Series : Sec. M/16**

*रोल नं०* | | | | | | | | | | |

***SET : C***

# संस्कृत

*(Academic)*

**1st SEMESTER**

(Only for Re-appear Candidates)

(New Book)

**शेमुषी भाग – 2**

**(Morning Session)**

*समय **2½** घण्टे ]* *[ पूर्णांक : **80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **8** तथा प्रश्न **12** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** तथा **सेट** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***



Downloaded from cclchapter.com

**निर्देशः –** *(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(iii) श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।*

**खण्डः 'क'**

**( अपठित-अवबोधनम् )**

**1.** अधोलिखितम् अनुच्छेदं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत – $2 \times 5 = 10$

संस्कृतभाषा वैज्ञानिकी भाषा अस्ति। अस्माकम् सर्वाणि आदर्शवाक्यानि संस्कृतभाषायामेव सन्ति। अस्यामेव भाषायाम् अस्माकं सर्वे संस्काराः सम्पन्नाः भवन्ति। भारतीयासंस्कृतिः संस्कृतभाषायामेव सुरक्षिता अस्ति। धार्मिक-सामाजिक-सांस्कृतिकदृष्ट्या संस्कृतस्य परमं महत्त्वमस्ति।

(क) भारतीयासंस्कृतिः कुत्र सुरक्षिता अस्ति ?

(ख) संस्कृतभाषा कीदृशी भाषा अस्ति ?

(ग) संस्कृतभाषायां के सम्पन्नाः भवन्ति ?

(घ) अस्माकं कानि संस्कृतभाषायामेव सन्ति ?

(ङ) अस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।

**खण्डः 'ख'**

**( रचनात्मक-लेखनम् )**

**2.** विकासः नैनीतालस्थे एकस्मिन् विद्यालये पठति। सः अमेरिका-वास्तव्यं मित्रं जोसेफं नैनीतालविषये पत्रम् एकं लिखति। मञ्जूषायां प्रदत्तैः पदैः पत्रे रिक्तस्थानानि पूरयित्वा उत्तरपुस्तिकायां लिखत – $1 \times 5 = 5$



Downloaded from cclchapter.com

परीक्षाभवनम्
तिथिः

प्रियमित्र जोसेफ,

सप्रेम नमस्ते।

अत्र कुशलं (i) ............ गतमासे आवयोः (ii) ............ वार्तालापः अभवत्। दिनद्वयानन्तरम् एव अत्र हिमपातः आरभत। तं द्रष्टुम् अनेके (iii) ............ दूरतः आगताः आसन्। नैनीसरः अत्र एकं विशेषम् (iv) ............ अस्ति। यात्रिणां समूहं (v) ............ स्थानीयाः आपणिकाः प्रमुदिताः आसन्।

अग्रिमे दिसम्बरमासे जनवरीमासे वा भवान् अत्र आगमिष्यति इति मे हार्दिकी कामना।

भवतः मित्रम्
विकासः।

**मञ्जूषा**

| दृष्ट्वा, आकर्षणस्थलम्, तत्रास्तु, यात्रिणः, दूरभाषेण। |
|---|

**3.** चित्रं दृष्ट्वा मञ्जूषातः उचितपदानि अवचित्य रिक्तस्थानानि पूरयित्वा उत्तरपुस्तिकायां लिखत – $1 \times 5 = 5$





Downloaded from cclchapter.com

(क) इदं चित्रम् ................ वर्तते।

(ख) अत्र द्वौ ................ स्तः।

(ग) बालकः ................ सह क्रीडति।

(घ) एका ................ रज्ज्वा क्रीडति।

(ङ) समीपे एकः ................ अस्ति।

**मञ्जूषा**

| |
|---|
| जलाशयः, कन्या, उद्यानस्य, वृक्षौ, मित्रैः। |

**अथवा**

( **केवलं प्रज्ञाचक्षुर्भ्यः** )

'मम मित्रम्' इति विषयम् अधिकृत्य पञ्चवाक्यानि संस्कृतभाषायां लिखत।

**खण्डः 'ग'**

( **अनुप्रयुक्त-व्याकरणम्** )

**4.** (क) सम्प्रदानकारकस्य परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 2

(ख) अव्ययस्य परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 2

**खण्डः 'घ'**

( **पठित-अवबोधनम्** )

**5.** अधोलिखितश्लोकस्य हिन्दीभाषायां व्याख्या कार्या – 5

*व्यायामं कुर्वतो नित्यं विरुद्धमपि भोजनम्।*
*विदग्धमविदग्धं वा निर्दोषं परिपच्यते।।*



Downloaded from cclchapter.com

**अथवा**

*अमन्त्रमक्षरं नास्ति, नास्ति मूलमनौषधम् ।*
*अयोग्यः पुरुषः नास्ति मोजकस्तत्र दुर्लभः।।*

**6.** अधोलिखितगद्यांशस्य हिन्दीभाषायां व्याख्या कार्या – 5

कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुथः ? अयमेकस्तावद्विभज्य भुज्यताम् । पश्चाद् अन्यो द्वितीयः कश्चिल्लक्ष्यते।

**अथवा**

तपोवनवासिनो देवीति नाम्नाह्वयन्ति, भगवान् वाल्मीकिर्वधूरिति।

**7.** अधोलिखितासु ***सूक्तिद्वयस्य*** भावं हिन्दीभाषायां लिखत – $2\frac{1}{2} \times 2 = 5$

(क) महानगरमध्ये चलदनिशं कालायसचक्रम् ।

(ख) बुद्धिर्बलवती तन्वि सर्वकार्येषु सर्वदा ।

(ग) मानवाय जीवनं कामये नो जीवन्मरणम् ।

**8.** अधोलिखितं श्लोकं पठित्वा प्रदत्तप्रश्नानामुत्तराणि संस्कृतपूर्णवाक्येन लिखत – $2 \times 3 = 6$

*मृगाः मृगैः सङ्गमनुव्रजन्ति, गावश्च गोभिः तुरगास्तुरङ्गैः।*
*मूर्खाश्च मूर्खैः सुधियः सुधीभिः, समान-शील-व्यसनेषु सख्यम्।।*

(क) सख्यं केषु भवति ?

(ख) गोभिः सङ्गं का अनुव्रजन्ति ?

(ग) मृगाः कैः सङ्गम् अनुव्रजन्ति ?

**9.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानामुत्तराणि संस्कृतपूर्णवाक्येन लिखत – $2 \times 5 = 10$



Downloaded from cclchapter.com

एकदा स कावेरीतीरपत्तने विगलितसमृद्धिं विरलभूषणां कुमारीमपश्यत्। तस्या अतुलितरूपसम्पदाभिभूतः शक्तिकुमारोऽचिन्तयत् – सेयमाकृतिर्न शीलविरोधिनी। आसज्जति मे हृदयमस्यामेव। तदेनां परीक्ष्योद्वहामि। स्नेहपूर्णदृष्टिः स आह – 'अस्ति ते कौशलं शालिप्रस्थेनानेन सम्पन्नमाहारम् अस्मान् भोजयितुम् ?'

(क) विरलभूषणा का आसीत् ?

(ख) सा आकृतिः कीदृशी न आसीत् ?

(ग) शक्तिकुमारः कुमारीं कुत्र अपश्यत् ?

(घ) कुमारीं दृष्ट्वा शक्तिकुमारः किम् अचिन्तयत् ?

(ङ) कुमारीं विलोक्य शक्तिकुमारः कीदृशः अभवत् ?

**10.** रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत – $1 \times 5 = 5$

(क) <u>उद्यमेन</u> समः बन्धुः नास्ति।

(ख) व्याघ्रं दृष्ट्वा <u>धूर्तः शृगालः</u> अवदत्।

(ग) <u>आत्महितैषिभिः</u> सर्वदा व्यायामः कर्तव्यः।

(घ) बालभावात् हिमकरः <u>पशुमस्तके</u> विराजते।

(ङ) सा कन्या <u>अतिथिं</u> स्नानाय प्रेरितवती।

**11.** 'शेमुषी' द्वितीयो भागः पाठ्यपुस्तकात् प्रथमसत्रीयपाठ्यक्रमात् कोऽपि ***एकः*** श्लोकः संस्कृतभाषायां लिखत। योऽस्मिन् प्रश्नपत्रे न स्यात्। 4

**खण्डः 'ङ'**

**( बहुविकल्पीय-खण्डम् )**

**12.** अधोलिखितप्रश्नानाम् प्रदत्तोत्तरविकल्पेषु एकं ***शुद्धविकल्पं*** विचित्य उत्तरपुस्तिकायां लिखत – $1 \times 16 = 16$

(क) 'इत्युक्त्वा' पदस्य सन्धिविच्छेदोऽस्ति –

(i) इत् + युत्वा (ii) इति + उक्त्वा

(iii) इत् + त्वा (iv) इत्यु + वा



Downloaded from cclchapter.com

(ख) 'द्वयोः + अपि' अत्र सन्धियुक्तपदम् –

(i) द्वयोरपि (ii) द्वपि

(iii) द्वितीयपि (iv) द्वापि

(ग) 'पञ्चवटी' इति पदे कः समासोऽस्ति ?

(i) बहुव्रीहिः (ii) तत्पुरुषः

(iii) द्वन्द्वः (iv) द्विगुः

(घ) 'निर्जलम्' इति पदस्य समासविग्रहः –

(i) जलम् निर् (ii) निरस्य जल

(iii) जलस्य अभावः (iv) जले निर्

(ङ) 'उभयतः' इति पदस्य योगे का विभक्तिः प्रयुज्यते ?

(i) प्रथमा (ii) द्वितीया

(iii) तृतीया (iv) चतुर्थी

(च) .............. जीवनं दुर्वहम् अस्ति। (रिक्तस्थानपूर्तिः अव्ययपदेन)

(i) अत्र (ii) देवः

(iii) रामः (iv) कृष्णः

(छ) 'दूषितम्' इति पदे कः प्रत्ययः ?

(i) क्त (ii) टाप्

(iii) क्त्वा (iv) ल्यप्

(ज) 'अग्नित्वम्' इति पदे कः प्रत्ययः ?

(i) तल् (ii) टाप्

(iii) त्व (iv) क्त्वा

(झ) 'गुरवे' इति पदे का विभक्तिः वर्तते ?

(i) प्रथमाविभक्तिः (ii) द्वितीयाविभक्तिः

(iii) तृतीयाविभक्तिः (iv) चतुर्थीविभक्तिः



Downloaded from cclchapter.com

(ञ) 'फल' शब्दस्य पञ्चमी-एकवचने शब्दरूपम् अस्ति –

(i) फलम् (ii) फले
(iii) फलात् (iv) फलानि

(ट) 'अस्ति' इति पदे कः लकारः वर्तते ?

(i) लट्लकारः (ii) लृट्लकारः
(iii) लोट्लकारः (iv) लङ्लकारः

(ठ) 'पठ्' धातो लोट्लकारे प्रथमपुरुषैकवचने रूपं भवति –

(i) पठिष्यति (ii) पठतु
(iii) अपठत् (iv) पठति

(ड) उद्याने **40** वृक्षाः सन्ति। (अङ्कस्थाने संस्कृतसंख्यावाचकपदं लिखत)

(i) चत्वारः (ii) त्रिंशत्
(iii) चत्वारिंशत् (iv) पञ्चाशत्

(ढ) 'शीघ्रम्' इति पदस्य समानार्थकपदम् –

(i) रूपम् (ii) देवम्
(iii) मूलम् (iv) सत्वरम्

(ण) 'सुलभः' इति पदस्य विलोमपदम् अस्ति –

(i) सम्पन्नः (ii) दुर्लभः
(iii) मित्रः (iv) कार्यः

(त) 'उदात्तरम्यः समुदाचारः' अत्र विशेषणपदं किम् ?

(i) रम्यः (ii) समुद्
(iii) समुदाचारः (iv) उदात्तरम्यः



Downloaded from cclchapter.com

**CLASS : 10th (Secondary)** **Code No. 2808**

**Series : Sec. M/2016**

*रोल नं०* | | | | | | | | | | |

***SET : C***

# संस्कृत

*(Academic)*

2nd Semester

(Only for Fresh/Re-appear Candidates)

**शेमुषी (नई पुस्तक)**

**(Morning Session)**

*समय : **2½** घण्टे ]* *[ पूर्णांक : **80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **8** तथा प्रश्न **11** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** तथा **सेट** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***



Downloaded from cclchapter.com

**निर्देश :** *(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(iii) श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।*

**खण्डः 'क'**

**(अपठित - अवबोधनम्)**

**1.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत – $5 \times 2 = 10$

संगणकस्य आविष्कारः श्रेष्ठतमः आविष्कारः अस्ति। संगणकस्य सहायतया उपग्रहाणां प्रक्षेपणं नियन्त्रणं च सरलतया कर्तुं शक्यते। सैन्यक्षेत्रे प्रक्षेपास्त्राणां सञ्चालनम् अपि संगणकस्य सहायतया एव भवति। अद्य निर्वाचनस्य मतानां गणना अपि संगणकेन भवति। चलसंगणकं (लैपटाप) इति संगणकम् तु कुत्रापि नेतुं शक्यते।

(क) किम कुत्रापि नेतुं शक्यते ?

(ख) संगणकस्य आविष्कारः कीदृशः अस्ति ?

(ग) कस्य मतानां गणना संगणकेन भवति ?

(घ) उपग्रहाणां प्रक्षेपणं कस्य सहायतया भवति ?

(ङ) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।

**खण्डः 'ख'**

**(रचनात्मक - लेखनम्)**

**2.** (क) भवान् दक्षः। भवतः भगिनी ज्वरेण पीडिता अस्ति। भगिनीस्वास्थ्यविषयकं मातरं प्रति लिखितं पत्रं मञ्जूषातः उचितपदानि चित्वा रिक्तस्थानानि पूरयत – $5 \times 1 = 5$



Downloaded from cclchapter.com

परीक्षाभवनम्

तिथिः

परमादरणीये मातः,

सादरं (i) ................।

अत्र कुशलं तत्रास्तु। भवत्याः (ii) ................ ज्ञातम् यत् मम प्रिया भगिनी ज्वरेण पीडिता अस्ति। अनेन समाचारेण अहं दुःखी (iii) ................। परीक्षायाः अनन्तरम् अहं गृहम् आगमिष्यामि। अहम् ईश्वरं प्रार्थये यत् सर्वं (iv) ................ भवतु।

भवत्याः पुत्रः

(v) ..................।

**मञ्जूषा**

| दक्षः, शुभम् , प्रणामः, पत्रेण, अस्मि। |
|---|

(ख) चित्रं दृष्ट्वा मञ्जूषातः उचितपदानि चित्वा रिक्तस्थानानि पूरयत – $5 \times 1 = 5$





Downloaded from cclchapter.com

(i) इदं चित्रं ................ अस्ति।

(ii) अत्र बालकाः .................. क्रीडन्ति।

(iii) जनाः .................. कुर्वन्ति।

(iv) समुद्रे जलयानानि .................. सन्ति।

(v) केचन बालकाः बालुकाभिः गृहाणि ................. ।

**मञ्जूषा**

| रचयन्ति, समुद्रतटस्य, अपि, कन्दुकेन, नौकाविहारम्। |
|---|

**अथवा**

**(केवलं प्रज्ञाचक्षुर्भ्यः)**

'जलस्य महत्त्वम्' इति विषयम् अधिकृत्य पञ्च-वाक्यानि संस्कृतभाषायां लिखत।

**खण्डः 'ग'**

**(अनुप्रयुक्त - व्याकरणम्)**

**3.** (क) 'अयादिसन्धेः' अथवा 'विसर्गसन्धेः' परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 2

(ख) 'द्विगुसमासस्य' अथवा 'बहुव्रीहिसमासस्य' परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 2

**खण्डः 'घ'**

**(पठित - अवबोधनम्)**

**4.** अधोलिखितगद्यांशस्य हिन्दीभाषायां व्याख्या कार्या – 5

(क) अपरेद्युः राज्ञो राजधानीं प्रति प्रस्थानोत्सुकस्य पुरतः कश्चित् शस्त्राहतः श्रमक्लान्तः पुरुषः आश्रममागतः। तस्य कष्टं विलोक्य दयार्द्रो मुनिर्यथासाध्यं तस्योपचारे प्रवृत्तः।

**अथवा**

(ख) चन्दनदासः – जयतु आर्यः।

चाणक्यः – श्रेष्ठिन् ! स्वागतं ते। अपि प्रचीयन्ते। संव्यवहाराणां वृद्धिलाभाः।



Downloaded from cclchapter.com

**5.** अधोलिखितश्लोकस्य हिन्दीभाषायां व्याख्या कार्या – 5

(क) रात्रौ जानुर्दिवा भानुः कृशानुः सन्ध्ययोर्द्वयोः।
इत्थं शीतं मया नीतं जानुभानुकृशानुभिः।।

**अथवा**

(ख) सुलभेष्वर्थलाभेषु परसंवेदने जने।
क इदं दुष्करं कुर्यादिदानीं शिविना विना।।

**6.** अधोलिखितगद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखित – $5 \times 2 = 10$

अग्रिमे दिने स आरक्षी चौर्याभियोगे तं न्यायालयं नीतवान्। न्यायाधीशो बंकिमचन्द्रः उभाभ्यां पृथक्-पृथक् विवरणं श्रुतवान्। सर्वं वृत्तमवगत्य स तं निर्दोषम् अमन्यत आरक्षिणं च दोषभाजनम्। किन्तु प्रमाणाभावात् स निर्णेतुं नाशक्नोत्। ततोऽसौ तौ अग्रिमे दिने उपस्थातुम् आदिष्टवान्।

(क) न्यायाधीशः कः आसीत् ?

(ख) अग्रिमे दिने आरक्षी किम् अकरोत् ?

(ग) न्यायाधीशः कस्मात् निर्णेतुं नाशक्नोत् ?

(घ) न्यायाधीशः उभाभ्यां कथं विवरणं श्रुतवान् ?

(ङ) सर्वं वृत्तान्तम् अवगम्य न्यायाधीशः दोषभाजनम् कम् अमन्यत् ?

**7.** अधोलिखितं श्लोकं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत – $3 \times 2 = 6$

एक एव खगो मानी वने वसति चातकः।
पिपासितो वा म्रियते याचते वा पुरन्दरम्।।

(क) चातकः कुत्र वसति ?

(ख) चातकः कीदृशः खगः अस्ति ?

(ग) पिपासितः चातकः किं करोति ?



Downloaded from cclchapter.com

**8.** प्रदत्तसूक्तिषु ***द्वयोः*** भावार्थं लिखत – $2 \times 2\frac{1}{2} = 5$

(क) रिक्तं भूतलमत्र नाथ भवतः पृष्ठे पलालोच्चयः।

(ख) किं तद् यन्न करोति दुःखगृहिणी देवे भृशं वर्षति।

(ग) रे रे चातक ! सावधानमनसा मित्र क्षणं श्रूयताम्।

**9.** रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत – $5 \times 1 = 5$

(क) प्राणिनः आकाशे पिपीलिका इव निहन्यन्ते।

(ख) मुनिः स्वकार्यसंलग्न एव राजानम् अभ्यनन्दत्।

(ग) शिविना विना इदं दुष्करं कार्यं कः कुर्यात्।

(घ) अम्भोदाः वृष्टिभिः वसुधाम् आर्द्रयन्ति।

(ङ) करुणापरो गृही तस्मै आश्रयं प्रायच्छत्।

**10.** प्रश्नपत्रे लिखितं श्लोकं विहाय 'शेमुषी' द्वितीयो भागः पाठ्यपुस्तकात् एकं श्लोकं संस्कृतभाषायां लिखत। 4

## खण्डः 'ङ'

### (बहुविकल्पीय - प्रश्नाः)

**11.** अधोलिखितप्रश्नानां प्रदत्तचतुर्षु वैकल्पिक-उत्तरेषु उचितमुत्तरं विचित्य लिखित – $16 \times 1 = 16$

(क) 'यथेष्टम्' इति पदे कः सन्धिविच्छेदः ?

(i) य + इष्टम् (ii) यस् + इष्टम्

(iii) यथा + टम् (iv) यथा + इष्टम्

(ख) 'शरत् + चन्द्रः' अत्र सन्धियुक्तपदम् –

(i) शचन्द्र (ii) शरचन्द्र

(iii) शरच्चन्द्रः (iv) शरीचन्द्र



Downloaded from cclchapter.com

(ग) 'निरापदम्' इति पदस्य विग्रहपदम् –

(i) निर् पदम् (ii) आपदानाम् अभावः

(iii) आपदे पदम् (iv) आपद् पदम्

(घ) 'महत्कम्पनम्' अत्र कः समासः ?

(i) तत्पुरुषः (ii) द्वन्द्वः

(iii) कर्मधारयः (iv) नञ्तत्पुरुषः

(ङ) 'बहिः' इति उपपदस्य योगे का विभक्तिः ?

(i) पञ्चमी (ii) प्रथमा

(iii) द्वितीया (iv) तृतीया

(च) 'करुणा' शब्दस्य तृतीयैकवचने किं रूपम् ?

(i) करुणाम् (ii) करुणया

(iii) करुणायाः (iv) करुणायाम्

(छ) 'आसीत्' इति पदे का धातुः ?

(i) आस् (ii) आसि

(iii) अस् (iv) भव्

(ज) 'नृत्यति' इति पदे कः लकारः ?

(i) लोट्लकारः (ii) लृट्लकारः

(iii) लङ्लकारः (iv) लट्लकारः

(झ) 'प्रविश्य' इति पदे कः प्रत्ययः ?

(i) क्त्वा (ii) तुमुन्

(iii) तव्यत् (iv) ल्यप्

(ञ) 'गम् + तव्यत्' इति संयोगे किं रूपम् ?

(i) गम्तव्यत् (ii) गतव्यत्

(iii) गन्तव्यः (iv) गतव्य



Downloaded from cclchapter.com

(ट) ............ चलचित्रगृहं नास्ति। (रिक्तस्थानपूर्तिः अव्ययपदेन)

(i) श्यामः (ii) अत्र

(iii) देवम् (iv) अनुजः

(ठ) 'बालकः शनैः चलति' अत्र अव्ययपदं किम् ?

(i) बालकः (ii) शनैः

(iii) चलति (iv) बाल

(ड) 'नवपञ्चाशत्' इति पदे का संख्या ?

(i) 59 (ii) 49

(iii) 69 (iv) 79

(ढ) 'उद्गिरन्तः' इति पदस्य किं समानार्थकपदम् ?

(i) नष्टाः (ii) प्रकटयन्तः

(iii) व्याकुलम् (iv) देवम्

(ण) 'स्वकीयानि कार्याणि' अत्र विशेषणपदम् किम् ?

(i) स्व (ii) कार्य

(iii) स्वकीयानि (iv) कार्याणि

(त) 'अग्रिमे दिने' अत्र विशेष्यपदं किम् ?

(i) अ (ii) अग्रि

(iii) अग्रिमे (iv) दिने



Downloaded from cclchapter.com